## श्री कृष्णाष्टकम् in Hindi

वसुदेव सुतं देवंकंस चाणूर मर्दनम् ।
देवकी परमानन्दंकृष्णं वन्दे जगद्गुरुम् ॥१॥

अतसी पुष्प सङ्काशम्हार नूपुर शोभितम् ।
रत्न कङ्कण केयूरंकृष्णं वन्दे जगद्गुरुम् ॥२॥

कुटिलालक संयुक्तंपूर्णचन्द्र निभाननम् ।
विलसत् कुण्डलधरंकृष्णं वन्दे जगद्गुरुम् ॥३॥

मन्दार गन्ध संयुक्तंचारुहासं चतुर्भुजम् ।
बर्हि पिञ्छाव चूडाङ्गंकृष्णं वन्दे जगद्गुरुम् ॥४॥

उत्फुल्ल पद्मपत्राक्षंनील जीमूत सन्निभम् ।
यादवानां शिरोरत्नंकृष्णं वन्दे जगद्गुरुम् ॥५॥

रुक्मिणी केलि संयुक्तंपीताम्बर सुशोभितम् ।
अवाप्त तुलसी गन्धंकृष्णं वन्दे जगद्गुरुम् ॥६॥

गोपिकानां कुचद्वन्द्वकुङ्कुमाङ्कित वक्षसम् ।
श्रीनिकेतं महेष्वासंकृष्णं वन्दे जगद्गुरुम् ॥७॥

श्रीवत्साङ्कं महोरस्कंवनमाला विराजितम् ।
शङ्खचक्रधरं देवंकृष्णं वन्दे जगद्गुरुम् ॥८॥

कृष्णाष्टक मिदं पुण्यंप्रातरुत्थाय यः पठेत् ।
कोटिजन्म कृतं पापंस्मरणेन विनश्यति ॥

## Shri Krishnashtakam in English

**Vasudev sutam devam kamsa chanura mardanam**
**Devaki parmanandam krishnam vande jagadgurum ||1||**

**Atasi pushpa sankasham hara noopura shobhitam**
**Ratna kankana keyuram krishnam vande jagadgurum ||2||**

**Kutilalaka sanyuktam purnachandra nibhananam**
**Vilasat kundaladharam krishnam vande jagadgurum ||3||**

**Mandara gandha sanyuktam charuhasam chaturbhujam**
**Barhi pincha avachudangam krishnam vande jagadgurum ||4||**

**Utphulla padmapatraksham neela jeemuta sannibham**
**Yadavanam shiro ratnam krishnam vande jagadgurum ||5||**

**Rukmini keli sanyuktam peetambara sushobhitam**
**Avapta tulasi gandham krishnam vande jagadgurum ||6||**

**Gopikanam kuchadvandva kunkumankita vakshasam**
**Shriniketam maheswasam krishnam vande jagadgurum ||7||**

**Shrivatsankam mahoraskam vanamala virajitam**
**Shankha chakradharam devam krishnam vande jagadgurum ||8||**

**Krishnashtakam idam punyam pratarutthaya yah pathet**
**Kotijanma kritam papam smaranena vinashyati ||**